# ॥ द्वादशोऽध्यायः ॥

ध्यानं
ॐ विध्युद्धाम समप्रभां मृगपति स्कन्ध स्थितां भीषणां ।
कन्याभिः करवाल खेट विलसद्दस्ताभि रासेवितां ॥
हस्तैश्चक्र गदासि खेट विशिखांश्चापं गुणं तर्जनीं ।
विभ्राणा मनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

ॐ देव्युवाच ॥ १॥
एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकलां बाधां नाशयिष्याम्य संशयम् ॥ २॥

मधुकैटभ नाशं च महिषासुर घातनम् ।
कीर्तयिष्यन्ति ये तद्वत् वधं शुम्भ निशुम्भयोः ॥ ३॥

अष्टम्यां च चतुर्दश्यां नवम्यां चैक चेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्य मुत्तमम् ॥ ४॥

न तेषां दुष्कृतं किञ्चित् दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्ट वियोजनम् ॥ ५॥

शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतो यौघात् कदाचित् सम्भविष्यति ॥ ६॥

तस्मान्ममैतन् माहात्म्यं पठितव्यं समाहितैः ।

श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥ ७॥

उपसर्गा नशेषांस्तु महामारी समुद्भवान् ।
तथा त्रिविध मुत्पातं माहात्म्यं शमयेन्मम ॥ ८॥

यत्रैतत्पठ्यते सम्यक् नित्य मायतने मम ।
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ९॥

बलिप्रदाने पूजायां अग्निकार्ये महोत्सवे ।
सर्वं ममैतच् चरितम् उच्चार्यं श्राव्यमेव च ॥ १०॥

जानता जानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथाकृतम् ॥ ११॥

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्ति समन्वितः ॥ १२॥

सर्वाबाधा विनिर्मुक्तो धनधान्य सुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३॥

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४॥

रिपवः सङ्क्षयं यान्ति कल्याणं चोपपद्यते ।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५॥

शान्ति कर्मणि सर्वत्र तथा दुःस्वप्न दर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६॥

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं च नृभि र्दृष्टं सुस्वप्न मुपजायते ॥ १७॥

बालग्रहाभि भूतानां बालानां शान्ति कारकम् ।
सङ्घात भेदे च नृणां मैत्री करण मुत्तमम् ॥ १८॥

दुर्वृत्ताना मशेषाणां बलहानि करं परम् ।
रक्षोभूत पिशाचानां पठना देव नाशनम् ॥ १९॥

सर्वं ममैतन्माहात्म्यं मम सन्निधि कारकम् ।
पशु पुष्पार्घ्य धूपैश्च गन्ध दीपै स्तथोत्तमैः ॥ २०॥

विप्राणां भोजनै र्होमैः प्रोक्षणीयै रहर्निशम् ।
अन्यैश्च विविधै र्भोगैः प्रदानै र्वत्सरेण या ॥ २१॥

प्रीतिर्मे क्रियते सास्मिन् सकृत् सुचरिते श्रुते ।
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२॥

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।
युद्धेषु चरितं यन्मे दुष्ट दैत्य निबर्हणम् ॥ २३॥

तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २४॥

ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ।
अरण्ये प्रान्तरे वापि दावाग्नि परिवारितः ॥ २५॥

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।
सिंह व्याघ्रानुयातो वा वने वा वन हस्तिभिः ॥ २६॥

राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्ध गतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७॥

पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृश दारुणे ।
सर्वा बाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८॥

स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात् ।
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९॥

दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ३०॥

ऋषिरुवाच ॥ ३१॥
इत्युक्त्वा सा भगवती चण्डिका चण्ड विक्रमा ॥ ३२॥

पश्यता मेव देवानां तत्रैवान्तर धीयत ।
तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥ ३३॥

यज्ञभाग भुजः सर्वे चक्रु र्विनिहतारयः ।
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥ ३४॥

जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुल विक्रमे ।
निशुम्भे च महावीर्ये शेषाः पाताल माययुः ॥ ३५॥

एवं भगवती देवी सा नित्यापि पुनः पुनः ।
सम्भूय कुरुते भूप जगतः परिपालनम् ॥ ३६॥

तयै तन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७॥

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ।
महाकाल्या महाकाले महामारी स्वरूपया ॥ ३८॥

सैव काले महामारी सैव सृष्टि र्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९॥

भवकाले नृणां सैव लक्ष्मी र्वृद्धिप्रदा गृहे ।
सैवाभावे तथालक्ष्मीर् विनाशा योपजायते ॥ ४०॥

स्तुता सम्पूजिता पुष्पैर् धूप गन्धादिभि स्तथा ।
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥ ४१॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
भगवती वाक्यं द्वादशोऽध्यायः ॥ १२॥